# Painganadu Ganapatishastrikritam Shiva Ashtakam

# પૈઙ્ગનાડુ ગણપતિશાસ્ત્રિકૃતં શિવાષ્ટકમ્

## Document Information

Text title : Painganadu Ganapatishastrikritam Shiva Ashtakam

File name : painganADugaNapatishAstrikRRitaMshivAShTakam.itx

Category : shiva, aShTaka

Location : doc_shiva

Proofread by : Sivakumar Thyagarajan Iyer

Description/comments : 45 in Stotrasamuchchaya 1, Edited by Pandit K. Parameshwara Aithal

Latest update : September 23, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 23, 2023

*sanskritdocuments.org*

# Painganadu Ganapatishastrikritam Shiva Ashtakam

# પૈઙ્ગનાડુ ગણપતિશાસ્ત્રિકૃતં શિવાષ્ટકમ્

ૐ શ્રીગણેશાય નમઃ ।
(વ્યુત્પત્તિર્નૈવ શાસ્ત્રેષુ તથા કાવ્યેષુ ચાપિ ન ।
કેવલં શિવપાદાબ્જસ્મરણાત્ કથયામ્યહમ્ ॥ ૧॥

વિનમ્ય વિપથાગ્રજીવિહિતલિપ્સવીક્ષાલવં
  વિનમ્રજનસન્તતેર્વિહિતસન્તતજ્ઞાનકમ્ ।
વિભું વિમલયામિનીવિધુકિશોરકેશાવલિં
  ગણેશવિદુષાધુના નિજકૃતિસ્તુ લેલિખ્યતે ॥ ૨॥)
પાકારિપ્રભૃતીન્ સુરાનવતિ યો નાકારિસઙ્ઘાત્ સદા
  પાકાત્ પુણ્યકૃતેઃ સ્વપાદયુગલીસ્વાકાઙ્ક્ષિચિત્તાય યઃ ।
સ્વાકારં દદતે સતોષમધુનોમાકામુક ત્વં પ્રભો
  મા કાર્ષીર્મયિ કોપલેશમપિ યલ્લોકાનુકમ્પી ભવાન્ ॥ ૧॥

ચન્દ્રો યન્મુખકાન્તિતુલ્ય ઇતિ તં લોકત્રયે દુર્લભં
  મત્વા દ્રષ્ટુમતીવ તોષસહિતો વિષ્ણુઃ પરામૃશ્ય ચ ।
અક્ષ્યેવૈકમચીક્લૃપત્ તમધુના પાપૌઘભૃઙ્ગાવલી-
  ભેદે વજ્રધરઃ સ્વયં શિવમિદં વિત્તં હિ જિજ્ઞાસતે ॥ ૨॥

ચન્દ્રં વીક્ષ્ય યદીયમાનનમિતિ ભ્રાન્ત્યા સરોજવ્રજો
  ભામાં પ્રાચિ ભરિષ્યતિ ચ્છવિભિરિત્યાલોચ્ય ભીત્યાકુલઃ ।
આકાઙ્ક્ષન્નિવ તત્ પ્ર(ભાતમધુના)પ્યાસ્તે નમન્મૂર્ધકં
  તત્તાદૃગ્વદનામ્બુજાય શિવ તે વીધીય (?) નિત્યં નતિમ્ ॥ ૩॥

પાદામ્ભોજયુગે હિ યસ્ય વિનમદ્બ્રહ્માદિદેવચ્છટા-
  કોટીરસ્થિતદેવરાણ્મણિગણસ્ફૂર્યુત્થિતાચ્છચ્છવિઃ ।
તાદર્થ્યામ્બુજસઙ્ઘસઙ્ગિવિલસદ્ભૃઙ્ગાર્દનાઙ્ગોઽપિ માં
  સોઽયં મન્દિરયત્યમન્દકુતુકાદાનન્દકન્દો મનઃ ॥ ૪॥

યત્પાદાબ્જયુગં સ્વકાન્તિસમતાવાઞ્છં સરોજવ્રજં

જિત્વા સ્વચ્છવિભિર્મૃણાલનિવહવ્યાજૈરહો રશ્મિભિઃ ।
બધ્દ્વાગ(જ્જનિમા)પ તજ્જલનિધૌ ભક્તેષ્ટદાતઃ પ્રભો
સ્વચ્છન્દં વિજરીહરીતુ મમ હૃત્સૌધે પદાબ્જં તવ ॥ ૫॥

યસ્ત્વલ્લોચનકાન્તિનીલજલદઃ પાપૌઘદાવાનલં
દામ્યન્ નિશ્ચલભક્તિયુક્તજનતાહૃચ્ચાતકાનાં મુદા ।
આત્માનન્દમયીં તનોતિ સતતં તૃપ્તિં દયામ્ભોનિધે
તૃષ્ણાદગ્ધમનન્યદેવશરણં હૃચ્ચાતકં પાતુ નઃ ॥ ૬॥

યસ્યેશસ્ય દિનેશરૂપમપિ યન્નેત્રં દયાશીતલ-
ચ્છાયં સ્વસ્ય હિ રશ્મિભિર્વિનતહૃત્પાથોજસઙ્ઘં સદા ।
સન્તોષેણ મહાવિકાસ ભરિતં સન્તન્યતે શઙ્કર
ત્વત્તત્તાદૃશલોચનેન મમ હૃત્પદ્મં તથા તન્યતામ્ ॥ ૭॥

લીલાલોલકટાક્ષદગ્ધમદનઃ કાલાન્તકઃ સર્પરા-
ણ્માલાલઙ્કૃતસર્વગાત્રરુચિરો હાલાહલોદ્યદ્ગલઃ ।
ચૂલાનન્તશિરઃકિરીટસુરરાણ્મૌલીવિરાજત્પદો
ફાલાલઙ્કૃતભૂતિરપ્યુપનિષજ્જાલસ્તુતઃ પાતુ નઃ ॥ ૮॥

રસલેશવિવર્જિતાં પ્રભો નુતિનામ્નીમધુના પ્રલાપવાચમ્ ।
સ્તુતિમેવ ગૃહાણ ધૂર્જટે નિજભક્તાધિકતોષદાનદક્ષ ॥ ૯॥

ઇતિ (પૈઙ્ગનાડુ) ગણપતિશાસ્ત્રિકૃતં શ્રીમચ્છિવાષ્ટકં સમ્પૂર્ણમ્ ।

(૪૫)

Proofread by Sivakumar Thyagarajan Iyer

*Painganadu Ganapatishastrikritam Shiva Ashtakam*
pdf was typeset on September 23, 2023

Please send corrections to *sanskrit@cheerful.com*